
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. M-2655 विषय

नाव भिष्मस्तवराज

लेखक/लिपीकार -

पृष्ठ 17 काळ - पुर्ण/ अपुर्ण

E

M-2656

॥श्रीगणेशाय नमः॥ ॐ यस्य स्मरणमात्रे
वि. णाजन्मसंसारबंधनात्॥ विमुच्यते नमस्त
स्मै विष्णवे प्रभविष्णवे॥१॥ नमः समस्तभू
तानां आदिभूताय भूभृते॥ अनेकरूप
रूपाय विष्णवे प्रभविष्णवे॥२॥ वैशंपाय
न उवाच॥ श्रुत्वा धर्मानशेषेण पावनानि च ३
सर्वशः॥ युधिष्ठिरः शांतनवं पुनरेवाभ्य

भाषतः॥३॥युधिष्टिरउवाच॥किमेकंदै
वतंलोकेकिंवाप्येकंपरायणं॥स्तुवंतःकिं
कमर्चंतःप्राप्नुयुः मानवाः शुभं॥४॥को
धर्मःसर्वधर्माणांभवतःपरमोमतः॥
किंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनात्
॥५॥भीष्मउवाच॥जगत्प्रभुंदेवदेवमनंतं
पुरुषोत्तमं॥स्तुवंनामसहस्रेणपुरुषःसत

तोस्थितः ॥६॥ तमेवचार्चयंनित्यंभक्त्यापुरु
वि. षमव्ययं ॥ ध्यायंस्तुवंनमस्यंचयजमानस्त
मेवच ॥७॥ अनादिनिधनंविष्णुंसर्वलोकमहे
श्वरं ॥ लोकाध्यक्षंस्तुवंनित्यंसर्वदुःखातिगो
भवेत् ॥८॥ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकि
र्तिवर्द्धनं ॥ लोकनाथंमहद्भूतंसर्वभूतभवो २
द्भवं ॥९॥ एषमेसर्वधर्माणांधर्मोधिकतमोम

त॥ यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा
१०॥ परमंयोमहत्तेजःपरमंयोमहत्तपः
परमंयोमहद्ब्रह्मपरमंयःपरायणं॥ ११॥ प
वित्राणांपवित्रंयोमंगलानांचमंगलं॥ दैव
तंदेवतानांचभूतानांयोव्ययःपिता॥ १२॥
यतःसर्वाणिभूतानिभवंत्यादियुगागमे॥
यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये॥ १३॥

वि॰

तस्यलोकप्रधानस्यजगन्नाथस्यभूपते॥ वि

ष्णोर्नामसहस्रंमेश्रृणुपापभयापहं॥ १४॥

यानिनामानिगौणानिविख्यातानिमहात्म

नः॥ ऋषिभिः परिगीतानितानिवक्ष्यामि

भूतये॥ १५॥ विष्णोर्नाम्नांसहस्रस्यवेदव्या

सोमहामुनिः॥ छंदोनुष्टुप्तथादेवोभग ३

वान्देवकीसुतः॥ १६॥ विष्णुंजिष्णुंमहा

विश्वंप्रभविष्णुमहेश्वरं॥ अनेकरूपदैत्यां
तंनमामिपुरुषोत्तमं॥१७॥ ॐ अस्यश्रीवि
ष्णोर्दिव्यसहस्रनामस्तोत्रमालामंत्रस्यभ
गवान्वेदव्यासऋषिः अनुष्टुप्छंदः श्रीकृ
ष्णपरमात्मादेवता॥ आत्मयोनिःस्वयंजात
इतिबीजं॥ देवकीनंदनःस्रष्टेतिशक्तिः॥ उ
द्भवःक्षोभणोदेवइतिमंत्रः॥ शंखभृन्नंदकी

वि॰

चक्रीतिकीलकं॥ त्रिसामासामगाः सामेतिक
वचं॥ शार्ङ्गधन्वाधनुर्गदाधर इत्यस्त्रं॥ ॐ
विश्वंविष्णुर्वषट्कार इति ध्यानं॥ श्रीविष्णु
प्रीत्यर्थे जपे विनियोगः॥ विश्वंविष्णुर्वषट्
कार इत्यंगुष्ठाभ्यां नमः॥ अमृतांशुद्भवो भा
नुरिति तर्जनीभ्यां नमः॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मे ४
ति मध्यमाभ्यां नमः॥ सुवर्णबिंदुरक्षोभ्य इ

स्य नाभि च्चा भ्यां नमः ॥ आदित्योज्योतिरा
दित्य इति कनिष्ठिकाभ्यां नमः ॥ शार्ङ्गधन्वा
गदाधर इति करतलकरपृष्ठाभ्यां नमः
॥ इति करन्यासः ॥ ॐ विश्वं विष्णुर्वषट्का
र इति हृदयाय नमः ॥ अमृतांशुद्भवो भानु
रिति शिरसे स्वाहा ॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति
शिखायै वषट् ॥ सुवर्णविंदुरक्षोभ्य इति क

वि·

वचायहुं॥ आदित्योज्योतिरादित्यइतिनेत्रत्रया
यवौषट्॥ शार्ङ्ग धन्वागदाधरइत्यस्त्रायफट्
विष्णोसहस्रनामजपमहंकरिष्ये इतिसंक
ल्प॥ अथध्यानं॥ शांताकारंभुजगशयनंपद्म
नाभंसुरेशं॥ विश्वाधारंगगनसदृशंमेघवर्ण
शुभांगं॥ लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्या ५
नगम्यं वंदेविष्णुंभवभयहरंसर्वलोकैकना

थं ॥१॥ श्रीवेदव्यासउवाच ॥ ॐ विश्वंविष्णु
र्वषट्कारोभूतभव्यभवत्प्रभुः भूतकृद्भूतभ
द्भावोभूतात्माभूतभावनः ३ पूतात्मापरमा
त्माचमुक्तानांपरमागतिः अव्ययःपुरुषः
साक्षीक्षेत्रज्ञोक्षरएवच ४ योगोयोगविदां
नेताप्रधानपुरुषेश्वरः नारसिंहवपुःश्री
मान्केशवःपुरुषोत्तमः ५ सर्वःशर्वश्शि

वि॰

वः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवोभाव
नोभर्ताप्रभवः प्रभुरीश्वरः ॥६॥ स्वयंभूः शं
भुरादित्यः पुष्कराक्षोमहास्वनः ॥ अनादिनि
धनोधाताविधाताधातुरुत्तमः ॥७॥ अप्रमे
योहृषीकेशः पद्मनाभोमरप्रभुः ॥ विश्वकर्मा
मनुस्त्वष्टास्थविष्टः स्थविरोध्रुवः ॥८॥ अग्रा
ह्यशास्वतः कृष्णोलोहिताक्षःप्रतर्दनः ॥ प्र

६

भूतस्त्रिककुब्धाम पवित्रंमंगलंपरं ॥ ९ ॥ ई
शानः प्राणदः प्राणोज्येष्ठः श्रेष्ठः प्रजाप
तिः ॥ हिरण्यगर्भोभूगर्भोमाधवोमधुसू
दनः ॥ १० ॥ ईश्वरोविक्रमीधन्वीमेधावीवि
क्रमः क्रमः ॥ अनुत्तमोदुराधर्षः कृतज्ञः
कृतिरात्मवान् ॥ ११ ॥ सुरेशः शरणंशर्मवि
श्वरेताः प्रजाभवः ॥ अहः संवत्सरोव्यालः प्र

स्थयः सर्वदर्शनः ॥३२॥ अजः सर्वेश्वरः सि
वि॰ द्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेया
त्मा सर्वयोगविनिःसृतः ॥३३॥ वसुर्वसुमनाः स्
सत्यः समात्मा संमितः समः ॥ अमोघः पुंड
रीकाक्षो वृषकर्मा वृषाकृतिः ॥३४॥ रुद्रो बहु
शिरो बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अं ७
[illegible] तिपाः ॥३५॥
मृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥३५॥

सर्वगः सर्वविद्भानुर्विश्वक्सेनोजनार्दनः ।
वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः ॥ १६
लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः कृताकृ
तः ॥ चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः
१७ ॥ भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदा
दिजः ॥ अनघोविजयोजेताविश्वयोनिःपु
नर्वसुः ॥ १८ ॥ उपेंद्रोवामनःप्रांशुरमोघः

वि. शुचिरूर्जितः ॥ अतींद्रः संग्रहः सर्गो धृतात्मा
नियमो यमः ॥ १९ ॥ वेद्यो वैद्यः सदायोगी वि
रहा माधवो मधुः ॥ अतींद्रियो महामायो महो
त्साहो महाबलः ॥ २० ॥ महाबुद्धिर्महावीर्यो
महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमा
नमेयात्मा महाद्रिधृक् ॥ २१ ॥ महेष्वासो म ८
हीभर्ता श्रीनिवासः सतां गतिः ॥ अनिरुद्धः सु

रानंदो गोविंदो गोविदांपतिः ॥ २२ ॥ मरीचिर्दम
नो हंसः सुपर्णो भुजगोत्तमः ॥ हिरण्यनाभः
सुतपाः ॥ पद्मनाभः प्रजापतिः ॥ २३ ॥ अमृत्युः
सर्वदृक् सिंहः संधाता संधिमान्स्थिरः ॥ अ
जो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥
२४ ॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः
निमिषोनिमिषः स्रग्वी वाचस्पतिरुदारधीः

सहस्राक्षः सहस्रपात् ॥२६॥ आ
वर्तनो निवृत्तात्मा २
२५॥ अग्रणी ग्रामणीः श्रीमान्न्यायो नेता स
वि. मीरणः ॥ सहस्रमूर्द्धा विश्वात्मा संवृतः संप्र
मर्दनः ॥ अहः संवर्त्तको वन्हिरनिलो धरणी
धरः ॥२७॥ सुप्रसादः प्रसन्नात्मा विश्वधृक्
विश्वभुग्विभुः ॥ सत्कर्त्ता सत्कृतिः साधुर्जन्हु हरि
र्नारायणो नरः ॥२८॥ असंख्येयोप्रमेयात्मा ९
विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसं

कल्पः सिद्धिदः सिद्धसाधनः ॥२९॥ वृषाही
वृषभो विष्णुः वृषपर्वा वृषोदरः ॥ वर्द्धनोव
र्द्धमानश्च विविक्तश्रुतिसागरः ॥३०॥ सुभु
जोदुर्धरो वाग्मि महेंद्रोवसुदोवसुः ॥ नैकरू
पोबृहद्रूपः शिपिविष्टः प्रकाशनः ॥३१॥ ओ
जस्तेजोद्युतिधरः प्रकाशात्माप्रतापनः ॥ ऋ
द्धः स्पष्टाक्षरोमंत्रः श्चंद्रांशुर्भास्करद्युतिः ॥

अमृतांशूद्भवो भानुः शशिबिंदुः सुरेश्वरः ॥

वि॰ औषधं जगतः सेतुः सत्यधर्मपरायणः ॥ ३३ ॥

भूतभव्यभवन्नाथः पवनः पावनोनलः ॥ का

महा काम कृत्कांतः कामी कामप्रदः प्रभुः ॥ ३४

युगादिकृद्युगावर्तो नैकमायो महाशनः ॥

अदृश्योव्यक्तरूपश्च सहस्रजिदनंतजित् ॥ १०

३५ ॥ इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो

वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महि
धरः ॥ ३६ ॥ अच्युतः प्रथितः प्राणः प्राणदो
वासवानुजः ॥ अपां निधिरधिष्टानमप्रमत्तः
प्रतिष्ठितः ॥ ३७ ॥ स्कंदः स्कंदधरो धुर्यो वर ६
दो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेव
पुरंदरः ॥ ३८ ॥ अशोकस्तारणः स्तारः शूरः शौ
रिर्जनेश्वरः ॥ अनुकूलः शतावर्तः पद्मी पद्म

चि॰ शरीरभृत्॥ महर्द्धिरृद्धो वृद्धात्मामहाक्षोगरुड

निमेक्षणः॥३९॥पद्मनाभोरविंदाक्षःपद्मगर्भः
शरीरभृत्॥ महर्द्धिरृद्धो वृद्धात्मामहाक्षोगरुड
ध्वजः॥४०॥अतुलःशरभोभीमःसमयज्ञोह
विर्हरिः॥सर्वलक्षणलक्षण्योलक्ष्मीवान्समि
तिंजयः॥४१॥विक्षरोरोहितोमार्गोहेतुर्दामोद
रःसहः॥महीधरोमहाभागोवेगवानमिताशा २१
नः॥४२॥उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्व

रः॥करणंकारणंकर्ता विकर्तागहनोगुहः
४३॥व्यवसायोव्यवस्थानःसंस्थानस्थानदो
ध्रुवः॥परर्द्धिः परमस्पष्ट स्तुष्टः पुष्टः शु
भेक्षणः॥४४॥रामोविरामो विरजोमार्गोनेयो
नयोनयः॥वीरश्शक्तिमतांश्रेष्ठोधर्मोधर्म
विदुत्तमः॥४५॥वैकुंठः पुरुषः प्राणः प्राण
दः प्रणवः प्रथुः॥हिरण्यगर्भः शत्रुघ्नोव्याप्तो

वासुरधोक्षजः ॥४६॥ ऋतुः सुदर्शनः कालः
वि. परमेष्ठी परिग्रहः ॥ उग्रः संवछरो दक्षो वि
श्रामो विश्वदक्षिणः ॥४७॥ विस्तारः स्थावरः स्था
णु प्रमाणं बीजमव्ययं ॥ अर्थोनर्थो महाको
शो महाभोगो महाधनः ॥४८॥ अनिर्विण्णः
भू स्थविष्ठोभूर्धर्मयूपो महामखः ॥ नक्षत्रनेमिर्न १२
क्षत्री क्षमः क्षामः समीहनः ॥४९॥ यज्ञ इज्यो

महेज्यश्चक्रतुःसत्रंसतांगतिः॥ सर्वदर्शी

विमुक्तात्मासर्वज्ञोज्ञानमुत्तमं॥५०॥ सुव्रतः

सुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत्॥ मनो

हरोजितःक्रोधोवीरबाहुर्विदारणः॥५१॥ स्वा

पनःस्ववशोव्यापिनैकात्मानैककर्मकृत् व

त्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः॥५२

धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरं॥ अवि

ज्ञानासहस्रांशुर्विधाताकृतलक्षण:॥५३॥ग
वि· भस्तिनेमिसत्वस्थ:सिंहोभूतमहेश्वर:॥आ
दिदेवोमहादेवोदेवेशोदेवभृद्गुरु:॥५४॥उत्त
रोगोपतिर्गोप्ताज्ञानगम्य:पुरातन:॥शरीर
भूतभृद्भोक्ताकपिंद्रोभूरिदक्षिण:॥५५॥सो
मपोमृतप:सोम:पुरुजित्पुरुषोत्तम:॥विनि ३३
योजय:सत्यसंधोदाशार्ह:सात्वतांपति:॥५६॥

जीवोविनयितासाक्षीमुकुंदोमितविक्रमः॥
अंभोनिधिरनंतात्मामहोदधिशयोंतकः
५७॥अजोमहार्हःस्वाभाव्योजितामित्रःप्रमो
दनः॥आनंदोनंदनोनंदःसत्यधर्मात्रिविक्र
मः॥५८॥महर्षिःकपिलाचार्यःकृतज्ञोमेदिनी
पतिः॥त्रिपदस्त्रिदशाध्यक्षोमहाशृंगःकृतां
तकृत्॥५९॥महावराहोगोविंदःसुषेणःकन

कांगदी॥ गुह्यो गंभीरो गहनो गुप्तश्चक्रगदा
धरः॥ ६० ॥ वेधास्वांगोजितः कृष्णोदृढः सं
कर्षणोच्युतः॥ वरुणो वारुणो वृक्षः पुष्क
राक्षो महामनाः॥ ६१ ॥ भगवान्भगहानंदी व
नमालीहलायुधः॥ आदित्योज्योतिरादित्यः
सहिष्णुर्गतिसत्तमः॥ ६२ ॥ सुधन्वाखंडप
रशुर्दारुणोद्रविणःप्रदः॥ दिवस्पृक्सर्व

दृग्व्यासो वाचस्पतिरयोनिजः ॥ ६३ ॥ त्रि
सामा सामगः साम निर्वाणं भेषजं भिष
क् ॥ संन्यासकृच्छमः शांतो निष्ठा शांतिपरा
यणः ॥ ६४ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः
कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृषभा
क्षो वृषप्रियः ॥ ६५ ॥ अनिवर्ति निवृत्तात्मा
संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवा

सः श्रीपतिः श्रीमतांवरः ॥ ६६ ॥ श्रीदः श्रीशः
वि. श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः
श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्रयः ॥ ६७ ॥ स्व
क्षः स्वांगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजि
तात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६८
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ॥ भू ३५
शयो भूषणो भूतिर्विशोकः शोकनाशनः ॥

६९ ॥ अर्चिष्मानर्चितः कुंभो विशुद्धात्मा
विशोधनः ॥ अनिरुद्धोप्रतिरथः प्रद्युम्नोमि
तविक्रमः ॥ ७० ॥ कालनेमिनिहा वीरः शुरः
शौरीर्जनेश्वरः ॥ त्रिलोकात्मा त्रिलोकेशः
केशवः केशिहा हरिः ॥ ७१ ॥ कामदेवः कामपा
लः कामिकांतः कृतागमः ॥ अनिर्देश्यव
पुर्विष्णुर्वीरोनंतो धनंजयः ॥ ७२ ॥ ब्रह्मण्यो

वि.

ब्रह्मकृद्ब्रह्मी ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्रह्मविद्ब्राह्म
णो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७३ ॥ महा
क्रमो महाकर्मा महातेजो महोरगः ॥ महाक्र
तुर्महायज्वा महायज्ञो महाहविः ॥ ७४ ॥ स्तव्यः
स्तवप्रियः स्तोत्रं स्तुतिः स्तोतारणःप्रियः ॥ पू
र्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७५ ३६
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥ वसु

प्रदोवासुदेवोवसुर्वसुमनाहविः॥७६॥स
द्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः।
शूरसेनोयदुश्रेष्ठःसंनिवासःसुयामुनः॥
७७॥भूतावासोवासुदेवःसर्वासुनिलयोनलः
दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः॥७८॥वि
श्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्॥अने
कमूर्तिरव्यक्तःशतमूर्तिःशताननः॥७९॥ए

वि॰

कोनेकसवःककिंयत्तत्पदमनुत्तमं॥लोकबंधु
र्लोकनाथोमाधवोभक्तवत्सलः॥८०॥सुवर्ण
वर्णोहेमांगोवरांगःश्चंदनांगदी॥वीरहावि
षमःशून्योघृताशीरचलश्चलः॥८१॥अमा
नीमानदोमान्योलोकस्वामीत्रिलोकधृक्॥
सुमेधामेधजोधन्यःसत्यमेधाधरः॥८२॥ते धरा
जोवृषोद्युतिधरःसर्वशस्त्रभृतांवरः॥प्रग्र ७

होनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ॥ ८३ ॥ च
तुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहः श्चतुर्गतिः ॥ चतुरा
त्माचतुर्भावः श्चतुर्वेदविदेकपात् ॥ ८४ ॥ स
मावर्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः ॥ दुर्ल
भोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥ ८५ ॥ शु
भांगोलोकसारंगः सुतंतुस्तंतुवर्द्धनः ॥ इंद्र
कर्मामहाकर्माकृतकर्माकृतागमः ॥ ८६ ॥

वि· उद्भवः सुंदरसुंदोरत्नभंनोः सुलोचनः ॥ अर्को
वाजसनः श्रृंगीजयंतः सर्वविज्जयी ॥ ८७ ॥ सु
वर्णबिंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः ॥ महाह्र
दोमहागर्तोमहाभूतोमहानिधिः ॥ ८८ ॥ कु
मुदः कुंदरः कुंदः पर्जन्यः पावनोनलः ॥ अ
मृतांशोमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८९ ॥ १८
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥

न्यग्रोधोदुंबरश्वत्थश्चाणूरांध्रनिषूदनः
॥९०॥सहस्रार्चिः सप्तजिह्वः सप्तैधाःसप्त
वाहनः॥अमूर्तिरनघोचिंत्यो भयकृद्भय
नाशनः॥९१॥अणुर्बृहत्कृशः स्थूलोगुण
भृन्निर्गुणोमहान्॥अधृतश्चधृतः स्वास्य
प्राग्वंशो वंशवर्द्धनः॥९२॥भारभृत्कथितोयो
गीयोगीशः सर्वकामदः॥आश्रमः श्रवणः

वि॰

क्षामसुपर्णोवायुवाहनः॥९३॥धनुर्धरोधनु
र्वेदोदंडोदमयितादमः॥अपराजितःसर्व
सहोनियंतानियमोयमः॥९४॥सत्ववान्सा
त्विकःसत्यसत्यधर्मपरायणः॥अभिप्रा
यःप्रियार्होर्हःप्रियकृत्प्रीतिवर्द्धनः॥९५॥वि
हायसगतिर्ज्योतिःसुरुचिर्हुतभुग्विभुः॥र ११
विर्विरोचनःसूर्यःसविताविलोचनः॥९६

अनंतोहुतभुग्भोक्तासुखदोनैकदोग्रजः
अनीर्विण्णः सदामर्षी लोकाधिष्टानमद्भु
तः॥९७॥सनात्सनातनतमः कपिलः कपिर
व्ययः॥स्वस्तिदः स्वस्तिकृत्स्वस्तिस्वस्तिभुक्
स्वस्तिदक्षिणः॥९८॥अरौद्रः कुंडलीचक्री
विक्रम्युर्जितशासनः॥शब्दातिगः शब्दसहः
शिशिरः शर्वरीकरः॥९९॥अक्रूरः पेशलोदक्षः

दक्षिणः क्षमिणां वरः ॥ विद्वत्तमो वीतभयः पु
वि· ण्यश्रवणकीर्तनः ॥ १०० ॥ उत्तारणो दुष्कृतीहा
पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः संतो
जीवनः पर्यवस्थितः ॥ १ ॥ अनंतरूपोनंत
श्रीर्जितमन्युर्भयापहः ॥ चतुरस्रोगभीरात्मा
विदिशोव्यादिशोदिशः ॥ २ ॥ अनादिर्भूर्भवोल २०
क्ष्मीसुवीरोरुचिरांगदः ॥ जननोजनजन्मादि

भीमो भीमपराक्रमः ॥ ३ ॥ आधारनिलयो धा
ता पुष्पहासः प्रजागरः ॥ ऊर्ध्वगः सत्पथाचारः
प्राणदः प्रणवः पणः ॥ ४ ॥ प्रमाणं प्राणनिलयः
प्राणभृत्प्राणजीवनः ॥ तत्त्वं तत्त्वविदेकात्मा
जन्ममृत्युजरातिगः ॥ ५ ॥ भूर्भुवः स्वस्तरुस्ता
रः सविता प्रपितामहः ॥ यज्ञो यज्ञपतिर्यज्वा
यज्ञांगो यज्ञवाहनः ॥ ६ ॥ यज्ञभृद्यज्ञकृद्यज्ञी

वि.

यज्ञभुग्यज्ञसाधनः॥यज्ञांतकृद्यज्ञगुह्यम
न्नमन्नादएवच॥७॥आत्मयोनिस्स्वयंजातोवै
खानःसामगायनः॥देवकीनंदनःस्रष्टाक्षी
तिशःपापनाशनः॥८॥शंखभृन्नंदकीचक्री
शार्ङ्गधन्वागदाधरः॥रथांगपाणिरक्षोभ्यः
सर्वप्रहरणायुधः॥९॥ॐनमोनमः॥इतिश्रीकी २१
र्तनीयस्यकेशवस्यमहात्मनः॥नाम्नांसहस्रंदि

आनां मन्त्रोषेण प्रकीर्तितं ॥ ३० ॥ य इदं शृणु
यान्नित्यं यश्चापि परिकीर्तयेत् ॥ नाशुभं मा
प्नुयात्किंचित्सोमुत्रेह च मानवाः ॥ ३१ ॥ वेदां
तगो ब्राह्मणस्यात्क्षत्रियो विजयि भवेत्
वैश्यो धनसमृद्धस्याच्छूद्रः सुखमवाप्नुया
त् ॥ ३२ ॥ कामानवाप्नुयात्कामी प्रजार्थी चा
प्नुयात्प्रजां ॥ धर्मार्थी प्राप्नुयात्कर्ममर्थार्थी

वि॰

र्थमाप्नुयात् ॥१३॥ भक्तिमान्यः सदोत्थायः

शुचिस्तद्गतमानसः ॥ सहस्रंवासुदेवस्य ना

म्नामेतत्प्रकीर्त्तयेत् ॥१४॥ यशः प्राप्नोति वि

पुलंज्ञातिप्राधान्यमेवच ॥ अचलांश्रीयमाप्नो

तिश्रेयःप्राप्नोत्यनुत्तमं ॥१५॥ नभयंक्वचिदा

प्नोतिवीर्यंतेजश्चविंदति ॥ भवत्यरोगोद्युति

मान्बलरूपोगुणान्वितः ॥१६॥ रोगार्तोमुच्य

२२

तेरोगाद्बद्धोमुच्येतबंधनात्॥ भयान्मुच्ये
तभीतस्तुमुच्येतापन आपदः॥ १७॥ दुर्गाण्य
तितरंत्याशुपुरुषःपुरुषोत्तमं॥ स्तुवंन्नाम
सहस्रेणनित्यंभक्तिसमन्वितं॥ १८॥ वासु
देवाश्रयोमर्त्योवासुदेवःपरायणः॥ सर्व
पापविशुद्धात्मायांतिब्रह्मसनातनं॥ १९
नवासुदेवभक्तानामशुभंविद्यतेक्वचि

वि.

त॥ जन्ममृत्युजराव्याधिभयंनैवोपजायते
२०॥ इमंस्तवमधीयानश्रद्धाभक्तित:॥ युजे समन्वी
तात्मासुखक्षांतिश्रीधृतिस्मृतिकीर्तिभि:
२१॥ नक्रोधोनचमात्सर्यंनलोभोमाशुभा
मति:॥ भवंतिकृतपुण्यानांभक्तानांपुरुषो
त्तमे॥ २२॥ द्यौस:चंद्रार्कनक्षत्राखंदिशोभू २३
र्महोदधि:॥ वासुदेवस्यवीर्येणविधृतानि

महात्मनः ॥ २३ ॥ ससुरासुरगंधर्वा सयक्षो
रगराक्षसः ॥ जगद्वशे वर्ततेदं कृष्णस्यस्य
राचरं ॥ २४ ॥ इंद्रियाणिमनोबुद्धिसत्वंतेजो
बलंधृतिः ॥ वासुदेवात्मकान्याहुः क्षेत्रक्षेत्र
ज्ञमेवच ॥ २५ ॥ सर्वागमानामाचारः प्रथमं
परिकल्पते ॥ आचारः प्रथमोधर्मः धर्मस्यप्र
भुरच्युतः ॥ २६ ॥ ऋषयः पितरोदेवाः महाभू

वि.

नस्कृतएवनसंज्ञाय:॥३३॥नमोस्त्वनंताय
सहस्त्रमूर्तयेसहस्त्रपादाक्षिशिरोरुबाह
वे॥सहस्त्रनाम्नेपुरुषायशाश्वतेसहस्त्र
कोटियुगधारिणेनम:॥३४॥नम:कमल
नाभायनमस्तेजलशायिने॥नमस्तेके
शवानंतवासुदेवनमोस्तुते॥३५॥वास २५
नावासुदेवस्यवासितंभुवनत्रयं॥सर्व

लोकनिवासीनां वासुदेव नमोस्तुते ॥ ३६ ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च
जगद्धिताय कृष्णाय गोविंदाय नमो नमः
३७ ॥ आकाशात्पतितं तोयं यथा गच्छति सा
गरं ॥ सर्वदेवनमस्कारं केशवं प्रतिगच्छति
३८ ॥ एष निःकंटकः पंथा यत्र संयुज्यते
हरिः ॥ कुपथं तं विजानीयात् गोविंदरहि

वि. तागमं ॥३९॥ सर्वदेवेषुयत्पुण्यंसर्वतीर्थेषुय
त्फलं ॥ तत्फलंश्रीयमाप्नोतिकृत्वादेवजनार्द
नः ॥४०॥ योनरःपठतेनित्यंत्रिकालंकेशवा
लये ॥ द्विकालमेककालंवाक्रूरंसर्वंव्यपोहति
४१ दह्यंतेरिपुवस्तस्यसौम्याःसर्वेसदाग्र
हाः ॥ विलीयंतेचपापानिस्तवेह्यस्मिन्प्रकीर्ति २६
ते ॥४२॥ येनध्यातंश्रुतंयेनयेनायंपठितःस्त

वः॥दात्तानिसर्वदानानिसुराःसर्वेसमर्चिताः
४३॥इहलोकेपरेवापिनभयंविद्यतेक्वचित्
नाम्नांसहस्रंयोधीतेद्वादश्यांसमसन्निधौ॥
४४॥सनिर्दहतिपापानिकल्पकोटिशतानि
च॥अश्वत्थःसन्निधोपार्थतत्वमानसिकेश
व॥४५॥पठेन्नामसहस्रंतुगवांकोटिफलंल
भेत्॥शिवालयेपठेन्नित्यंतुलसिवनसंस्थि

वि॰

तः॥१४६॥ नरोमुक्तिमवाप्नोतिचक्रपाणेर्वचोयथा॥ ब्रह्महत्यादिकंपापंसर्वपापंविनश्यति॥ ॥१४७॥ इतिश्रीमहाभारतेशतसहस्रसंहितायांवैयासिक्यांशांतिपर्वणिउत्तमानुशासनेदानधर्मोत्तरेविष्णुसहस्रनामस्तोत्रसंपूर्णः॥ ॥ ॥श्रीकृष्णवासु०॥

२७

[OrderDescription]
,CREATED=24.07.20 14:02
,TRANSFERRED=2020/07/24 at 14:12:30
,PAGES=53
,TYPE=STD
,NAME=S0003373
,Book Name=M-2655-BHISHAM STAV RAJ
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,